# Shri Sukhanandacharyapranita Shrutisiddhantadipika

# શ્રીસુખાનન્દાચાર્યપ્રણીતા શ્રુતિસિદ્ધાન્તદીપિકા

## Document Information

Text title : Shri Sukhanandacharyapranita Shrutisiddhantadipika

File name : shrutisiddhAntadIpikA.itx

Category : misc, rAmAnanda, advice, upadesha

Location : doc_z_misc_general

Author : sukhAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

Shri Sukhanandacharyapranita Shrutisiddhantadipika

# શ્રીસુખાનન્દાચાર્યપ્રણીતા શ્રુતિસિદ્ધાન્તદીપિકા

નમસ્કૃત્ય પરં બ્રહ્મ સીતયા સહ રાઘવમ્ ।
આનન્દભાષ્યકૃદ્રામાનન્દાચાર્યં સમાશ્રયે ॥ ૧॥

પાદપદ્મં ગુરોર્નત્ત્વા સંસારાર્ણવતારકમ્ ।
કુર્વે સિદ્ધાન્તબોધાય શ્રુતિસિદ્ધાન્તદીપિકામ્ ॥ ૨॥

વિશિષ્ટાદ્વૈતનામા હિ સિદ્ધાન્તઃ શ્રુતિસમ્મતઃ ।
"સદેવ સોમ્યેદમગ્રે" ઇત્યેતચ્છ્રુતિમાનતઃ ॥ ૩॥

તત્ર ચિદચિદીશેતિભેદાત્ તત્ત્વં ત્રિધા મતમ્ ।
"ક્ષરં પ્રધાનમિ "ત્યેતચ્છ્રુતેસ્તત્ર પ્રમાણતા ॥ ૪॥

તત્ર જ્ઞાનસ્વરૂપોઽણુશ્ચિદર્થો જીવ ઉચ્યતે ।
પરાગથાજડં નિત્યં વિભુ જ્ઞાનં હિ તદ્ગુણઃ ॥ ૫॥

સંયોગગતિમત્ત્વાચ્ચ દ્રવ્યત્વમુભયોર્મતમ્ ।
પરેણ જ્ઞાનવેદ્યોઽપિ સ્વાત્મા સ્વેનાપિ ગૃહ્યતે ॥ ૬॥

વિકારિતા મતા જ્ઞાને નાત્મનિ સા હિ સમ્મતા ।
સઙ્કોચશ્ચ વિકાસશ્ચ વિકારૌ સમ્મતૌ મતૌ ॥ ૭॥

"અહં જાનામિ" ઇત્યેષા પ્રતીતિઃ સર્વસમ્મતા ।
જ્ઞાનાશ્રયસ્તતશ્ચાત્મા જ્ઞાનં ગુણસ્તથાત્મનઃ ॥ ૮॥

આત્મતજ્જ્ઞાનયોશ્ચાથ પ્રકાશભૂતયોસ્તથા ।
આધારાધેયભાવો હિ દીપતત્પ્રભયોરિવ ॥ ૯॥

વિષયાણાં પ્રકાશસ્ય કાલે જ્ઞાનં પ્રકાશતે ।
પ્રકાશતે સદા ચાત્મા ધર્મિભૂતઃ સનાતનઃ ॥ ૧૦॥

અનુકૂલસ્તથા ચૈકઃ સ્ફુરત્યાત્મા સદૈવ હિ ।
જ્ઞાનં ચાપ્યનુકૂલત્વાત્ સુખરૂપં મતં બુધૈઃ ॥ ૧૧॥

“અહં સુખં કિલાસ્વાપ્સમિ” ત્થમ્ભૂતપ્રતીતિતઃ ।
આત્મા સુખસ્વરૂપોઽત્ર સ્વસ્મૈ ચ સ્વપ્રકાશતા ॥ ૧૨॥

જ્ઞાને નિત્યવિભૂતૌ ચ પરસ્મૈ સ્વપ્રકાશતા ।
સ્વાન્યનિર્વાહકત્વેન દીપવત્ તત્ર સા મતા ॥ ૧૩॥

અણુત્વેઽપ્યાત્મનસ્તસ્ય જ્ઞાનં વિભુ યતસ્તતઃ ।
સુખદુઃખોપલબ્ધિર્હિ ભાલાદૌ સમ્મતા બુધૈઃ ॥ ૧૪॥

એકકાલે તથાઽનેકકાયગ્રહશ્ચ યોગિનામ્ ।
શ્રુતં જ્ઞાનસ્ય નિત્યત્વં “ન વિજ્ઞાતુ” રિતિશ્રુતૌ ॥ ૧૫॥

ઉત્ક્રાન્તિગમનાદિભ્યશ્ચાત્માઽણુર્ન વિભુર્મતઃ ।
“એષોઽણુરાત્મા” ઇત્યેવમણુત્વં ચાત્મનઃ શ્રુતમ્ ॥ ૧૬॥

બાલસ્ય સ્તન્યપાને હિ પ્રવૃત્તેર્નિત્યતાઽઽત્મનઃ ।
“અજો નિત્યઃ શાશ્વતોઽયમ્” પ્રમાણં તત્ર વિદ્યતે ॥ ૧૭॥

મધ્યમપરિમાણત્વે ત્વાત્માઽનિત્યો ભવેત્ કિલ ।
સાવયવત્વહેતોર્હિ લોકે ઘટપટાદિવત્ ॥ ૧૮॥

કૃન્તસ્ય વિપ્રણાશ્ચાકૃતસ્યાગમનં ખલુ ।
અનિત્યત્વે મતે જીવે સ્યાતાં દોષૌ દુરુદ્ધરૌ ॥ ૧૯॥

આત્મા શરીરતો ભિન્નો “મમ દેહઃ” પ્રતીતિતઃ ।
જીવે તાદૃક્પ્રતીતેશ્ચ પ્રાણધીન્દ્રિયભિન્નતા ॥ ૨૦॥

શેષત્વાણુત્વધર્મેભ્યો જીવો બ્રહ્મવિલક્ષણઃ ।
બદ્ધઃ સ કર્મભિર્બદ્ધો મુક્તો મુક્તશ્ચ કર્મભિઃ ॥ ૨૧॥

પ્રારબ્ધમુપભુજ્યાથ દેહં ત્યક્ત્વાઽર્ચિરાદિના ।
સાકેતેઽષ્ટગુણૈર્યુક્તો મુક્તો રામાનુભાવકઃ ॥ ૨૨॥

શ્રીરામસ્ય પ્રપત્ત્યા વા ભક્તયા મુક્તો ભવેન્નરઃ ।
જીવાઃ પરસ્પરં ભિન્નાઃ સુખિદુઃખિવ્યવસ્થયા ॥ ૨૩॥

“નિત્યો નિત્યાનામિ” ત્યેવં શ્રુત્યાં નાના હિ તે શ્રુતાઃ ।
બ્રહ્મણો રૂપહીનત્વાત્ પ્રતિબિમ્બા ન તસ્ય તે ॥ ૨૪॥

અચેતનમચિત્તત્ત્વં ચતુર્ધા સમ્પ્રકીર્ત્તિતમ ।
કાલશ્ચ પ્રકૃતિઃ શુદ્ધસત્ત્વં જ્ઞાનં તથૈવ ચ ॥ ૨૫॥

કાલો જડો વિભુર્દ્રવ્યં ખણ્ડાખણ્ડેતિભેદતઃ ।
દ્વિવિધઃ સ નિમેષાદિઃ ખણ્ડોઽનિત્યઃ પ્રકીર્ત્તિતઃ ॥ ૨૬॥

ભૂતાદિવ્યવહારાણાં કારણં કાલ એવ હિ ।
નિત્યસ્ત્વખણ્ડકાલો હિ નિત્યધામ્નિ ન સ પ્રભુઃ ॥ ૨૮॥

સત્વાદિત્રિગુણાધારઃ પ્રકૃતિઃ પરિકીર્ત્તિતા ।
અચેતના પરાર્થા સા નિત્યા સતતવિક્રિયા ॥ ૨૮॥

અનાત્મનિ શરીરે સા ચાત્મબુદ્ધિવિધાયની ।
આત્મનિ પરતન્ત્રે સા સ્વાતન્ત્ર્યબુદ્ધિકારિણી ॥ ૨૯॥

પુરુષાર્થત્વબુદ્ધિં સા ત્વૈશ્વર્યાદૌ કરોતિ હિ ।
આત્મન્યનીશ્વરે ચાપિ સા કરોતીશતામતિમ્ ॥ ૩૦॥

રામશેષેષુ જીવેષુ બોધયત્યન્યશેષતામ્ ।
કરોત્યુપાયબુદ્ધિં ચ સાઽનુપાયે તથૈવ હિ ॥ ૩૧॥

સત્વં રજસ્તમ ઇતિ ગુણેષુ પ્રકૃતેરથ ।
વૈષમ્યાચ્ચ ભવન્તીહ વિકારા મહદાદયઃ ॥ ૩૨॥

ચતુર્વિંશતિરૂપા તત્ પ્રકૃતિઃ પરિકીર્ત્તિતા ।
પ્રકૃતેશ્ચ મહાસ્તસ્માદહઙ્કારસ્ત્રિધા તતઃ ॥ ૩૩॥

સાત્વિકાદિન્દ્રિયાણિ સ્યુરેકાદશવિધાનિ હિ ।
જ્ઞાનકર્મેન્દ્રિયત્વાભ્યાં દ્વિધા, તત્રાદિમાનિ તુ ॥ ૩૪॥

મનઃ શ્રોત્રં ચ ચક્ષુશ્ચ ત્વગ્ઘ્રાણરસનાનિ ચ ।
વાક્પાણિપાદપાયૂપસ્થાખ્યાન્યન્ત્યાનિ પઞ્ચ હિ ॥ ૩૫॥

તામસાહઙ્કૃતેશ્ચાથ શબ્દતન્માત્રકોદ્ભવઃ ।
તતો વ્યોમ તતઃ સ્પર્શસ્તતો વાયુશ્ચ વાયુતઃ ॥ ૩૬॥

રૂપતન્માત્રકં જાતં તસ્માત્ તેજો રસસ્તતઃ ।
રસાદાપસ્તથા ચાદ્ભ્યો ગન્ધો ગન્ધાદ્ વસુન્ધરા ॥ ૩૭॥

રાજસાહઙ્કૃતિઃ પ્રોક્તા તૂભયોઃ સહકારિણી ।
પઞ્ચીકૃત્ય ચ ભૂતેભ્યો રામો જગત્ કરોતિ હિ ॥ ૩૮॥

શ્રોત્રાદિવિષયાસ્તત્રાદ્રવ્યશબ્દાદયો ગુણાઃ ।

પરિણામો જગત્ સત્યં સદ્વારકો હિ બ્રહ્મણઃ ॥ ૩૯॥

“તમસઃ પરસ્તાદે” વં શ્રુતિભિઃ પરિવર્ણિતમ્ ।
શુદ્ધસત્ત્વાશ્રયો દ્રવ્યં શુદ્ધસત્ત્વં પ્રકીર્ત્તિતમ્ ॥ ૪૦॥

નિત્યનામથ મુક્તાનામીશ્વરસ્ય તથૈવ ચ ।
કાલાવશ્યં ચ નિત્યં ચ ભોગસ્થાનાદિ તન્મતમ્ ॥ ૪૧॥

પ્રાપ્યતે તદ્ધિ ભક્ત્યા ચ પ્રપત્ત્યા ચાર્ચિરાદિના ।
રામાધીનં ચ તદ્ધામ યદ્ ગત્વા ન નિવર્ત્તતે ॥ ૪૨॥

જ્ઞાનં નિરૂપિતં ચાથ રામ ઈશો નિરૂપ્યતે ।
યસ્ય ભક્ત્યા પ્રપત્ત્યા ચ સાયુજ્યં પ્રાપ્યતે ધ્રુવમ્ ॥ ૪૩॥

શ્રીરામોઽસ્તિ પરબ્રહ્મ વિભૂતિદ્વયનાયકઃ ।
ઉપાદાનં નિમિત્તં ચ જગતોઽસ્ય મતઃ શ્રુતૌ ॥ ૪૪॥

વિકારઃ સમ્મતો યસ્માચ્ચિદચિતોઃ પ્રકારયોઃ ।
પ્રકારિણિ તતો રામે ચાક્ષતા નિર્વિકારતા ॥ ૪૫॥

સર્વશક્તિરદોષોઽથ રામો દિવ્યગુણાર્ણવઃ ।
આર્ત્તાદિભિશ્ચતુર્ભિશ્ચોપાસ્યો મોક્ષપ્રદાયકઃ ॥ ૪૬॥

જગજ્જન્માદિલીલશ્ચ ભગવાન્ વિભુરવ્યયઃ ।
સચ્ચિદાનન્દરૂપશ્ચ સીતાનાથઃ પરેશ્વરઃ ॥ ૪૭॥

આરાધ્યઃ ફલદશ્ચાથ જનાનાં સર્વકર્મણામ્ ।
દિવ્યદેહોઽતિરમ્યશ્ચ યોગિધ્યેયશ્ચ સર્વવિત્ ॥ ૪૮॥

પરો વ્યૂહસ્તથાઽન્તઃસ્થો વિભવોઽર્ચાવતારકઃ ।
પઞ્ચધૈવં સ્થિતઃ સર્વશેષી સર્વશરીરકઃ ॥ ૪૯॥

ચિદચિદ્ભ્યાં વિશિષ્ટત્વાદ્ વિશિષ્ટં બ્રહ્મ મન્યતે ।
બ્રહ્મણો દેહ રૂપત્વાચ્ચિદચિતોઃ પ્રકારતા ॥ ૫૦॥

સૂક્ષ્માભ્યાં ચિદચિદ્ભ્યાં હિ વિશિષ્ટં બ્રહ્મ કારણમ્ ।
સ્થૂલાભ્યાં ચિદચિદ્ભ્યાં તદ્ વિશિષ્ટં કાર્યમુચ્યતે ॥ ૫૧॥

એકત્વં હિ શ્રુતૌ યસ્માત્ કાર્યકારણ બ્રહ્મણોઃ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તસ્તતોઽદોષશ્ચ વૈદિકઃ ॥ ૫૨॥

રામાનન્દાર્યસચ્છિષ્યસુખાનન્દાર્યનિર્મિતા ।
સિદ્ધાન્તબોધિની ભૂયાચ્છ્રુતિસિદ્ધાન્તદીપિકા ॥ ૫૩॥

ઇતિ શ્રીસુખાનન્દાચાર્યપ્રણીતા શ્રુતિસિદ્ધાન્તદીપિકા સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Shri Sukhanandacharyapranita Shrutisiddhantadipika*
pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*